# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल्, २०१६

कक्षा – आचार्यद्वितीयवर्षम् (SEM-4) **प्रश्नपत्रम् – ३** गुणाः - ७०

विषयः – पौरोहित्यम् **कोड – – C.C.5.4.11** समयः – ३.००-६.००

दिनाङ्कः – १९/०४/२०१६ सन्दर्भग्रन्थः – संस्कारदीपकः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः श्लोकयोः एकस्य श्लोकस्य यथाशास्त्रं व्याख्या कार्या ।** ०४

(१) अर्क त्वं ब्रह्मणा सृष्ट सर्वप्राणिहिताय च ।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धन ॥

(२) स्वर्णम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी।
तया सह विवाहे तु पुनर्भूत्वं न जायते॥

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत ।** १२

(१) कुम्भविवाहप्रयोगविधिं संस्कारभास्करदिशा वर्णनंकुरुत ।

(२) विष्णुप्रतिमाविवाहप्रयोगविषये यथाशास्त्रं विवेचनां कुरुत ।

**प्रश्नः – ३ निम्नलिखितेषु टिप्पणीद्वयं लिखत ।** ०४

(१) सीमन्तसंस्कारे द्रव्याणि (२) गर्भाधानसंस्कारः (३) द्विरागमनविधिः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः सूत्रयोः एकस्य सूत्रस्य यथाभाष्यं व्याख्या कार्या** ०४

(१) पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्।
न पक्वेन न चामेन कल्याणान्यभिकामयन् ॥

(२) नामधेयं दशम्यां च द्वादश्यां वाऽस्य कारयेत् ।
पुण्ये तिथौ मूहुर्ते वा नक्षत्रे वा गुणान्विते ॥

**प्रश्नः – ५ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखत ।** १२

(१) संस्कारदीपकदृष्ट्या चूडाकरणसंस्कारे आगतानां सूत्राणां व्याख्यां कुरुत ।

(२) यथाशास्त्रं षष्ठीमहोत्सवप्रयोगविधिं वर्णयत ।

**प्रश्नः – ६ निम्नलिखितेषु टिप्पणीद्वयं लिखत ।** ०४

(१) आयुष्यकरणम् (२) पञ्चगव्यविधिः (३) निष्क्रमणम्

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ७ अधोलिखितयोः श्लोकयोः एकस्य श्लोकस्य यथाशास्त्रं व्याख्या कार्या ।** ०४

(१) घस्रद्वये जन्मतिथिर्यदिस्यात् कुर्यात्तदा जन्मभसंयुतां च।
असङ्गता तेन दिनद्वयेऽपि पूज्या परा या भवतीह यत्नात् ॥

(२) भास्वरभूषणदीप्तो बृहदुदर: पद्मविष्टरोल्लिसत: ।
ध्येयोऽनायतदो: पदसरसिरुह: सदा मनुजै: ॥

**प्रश्न: – ८ अधोलिखितयो: प्रश्नयो: कस्यचिदेकस्योपरि निबन्धं लिखत । ०८**

(१) यथाशास्त्रं अन्नप्राशनप्रयोगविधिं वर्णयत ।

(२) कर्णवेधसंस्कारप्रयोग: कथं कर्तव्य इति समन्त्रकं प्रतिपादयत।

**प्रश्न: – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत। ०४**

(१) चूडाकरणस्य काल: क: ?

(२) नामकरणसंस्कारे कस्याग्ने: आवाहनं भवति ?

(३) अन्नप्राशनसंस्कारस्य समय: क: ?

(४) पात्रासादने कानि द्रव्याणि भवन्ति ?

(५) संस्कारदीपकदृष्ट्या जन्मदिवसशब्देन किं गृह्यते?

## चतुर्थान्विति: (Unit-४)

**प्रश्न: – १० अधोलिखितयो: मन्त्रयो: एकस्य मन्त्रस्य यथाशास्त्रं सप्रसंगव्याख्या कार्या । ०४**

(१) येनेन्द्राय बृहस्पतिर्व्वास: पर्यदधादमृतम् ।
तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय व्वर्चसे ॥

(२) उदुत्तमं व्वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा व्वयमादित्यव्व्रते तवनागसो अदितये स्याम ॥

**प्रश्न: – ११ अधोलिखितयो: प्रश्नयो: कस्यचिदेकस्योपरि निबन्धं लिखत । ०८**

(१) उपनयनकर्मप्रयोगविधिं यथाशास्त्रं वर्णयत।

(२) आधुनिकसमाजे वेदारम्भसंस्कारस्योपादेयता विद्यते न वा विचारयत ॥

**प्रश्न: – १२ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत ०३**

(१) उपनयनसंस्कारे कस्याधिकार: ?

(२) उपनयनसंस्कारे कस्याग्ने: आवाहनं भवति ?

(३) सामवेदस्य प्रथममन्त्र: क: ?

(४) "भो गुरो अहं स्नास्यामि" – इति कथनेन किं ज्ञायते ?

(५) षोडशवर्षस्य केशान्त: इति कस्य वचनम् ?

***